श्रीगणेशायनमः॥हरिः ॐ॥अथत्वरितरुद्रविधानं॥तत्रायं
कालः॥चैत्रादिमासेषुसिद्धाः॥१॥संपत्तिर्विशाखः॥२॥नाराः
ज्येष्ठः॥३॥श्रीयुःआषाढः॥४॥नाशःश्रावणः॥५॥नाशः
भाद्रपदः॥६॥अर्थःआश्विनः॥७॥संचयःकार्तिकः॥८॥
शुभःमार्गशीर्षः॥९॥लाभःपौषः॥१०॥मोक्षःमाघः॥
११॥व्ययःफाल्गुनः॥१२॥इतिद्वादशमासाः॥अ
थतिथिषु॥प्रतिपदा॥द्वितीया॥पंचमी॥षष्ठी
॥त्रयोदशी॥पौर्णिमा॥एतातिथयःप्रशस्ताः॥

वारेषु॥शनिभौमवर्जिताःप्रशस्ताः॥अथनक्षत्रेषु॥रोहिणी
मृगआर्द्रापुष्यमघाउत्तराफल्गुनीचित्रास्वातिअनुरा
धामूलश्रवणधनिष्ठारेवतीएतानक्षत्राणिप्रशस्तानि॥अथ
योगाःस्युः॥व्यतिपातवैधृतिपरिघंअतिगंडातपातौवज्रंचै
तेअथयोगाः॥पुर्वोच्चरितएवंपुण्यतिथौअमुकमुद्दिश्यअ
मुकसंख्ययात्वरितरुद्रजपमहंकरिष्ये॥तदंगगणपतिपू
जनादिसर्वंकृत्वाब्राह्मणंवृत्वास्वयमेवकुर्यात्॥भूतशुध्या
दिकलशस्थापनांतंकृत्वा॥मूर्तिस्थापनाविशेषः॥रुद्रप्रतिमां
कृत्वाअग्न्युत्तारणपूर्वंकलशाप्यां॥पंचखाद्यनैवेद्यं॥अगरुधूपं॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

तेलदीपंकृत्वासमीपेजपंकुर्यात्॥अस्यश्रीत्वरितरुद्रमंत्रस्य॥अथर्व
णऋषिः॥अनुष्टुप्छंदः॥त्वरितरुद्रोदेवता॥नमःशक्तिः॥अस्त्रिगिरा
क्तिः॥क्षिप्रकार्यसिध्यर्थेत्वरितरुद्रजपेविनियोगः॥मूलमंत्रेणकरशु
द्धिंकृत्वा॥पश्चादंगुलिन्यासमारभेत्॥ॐयोरुद्रोअग्नोअंगुष्ठाभ्यां॰
ॐयोऽअप्सुतर्जनीभ्यां॰ॐययोषधीषुमध्यमाभ्यां॰ॐयोरुद्रो
विश्वाअनामिकाभ्यां॰ॐभुवनाविवेशकनिष्ठिकाभ्यां॰ॐतस्मै
रुद्रायनमोऽस्तुकरतलकरपृष्ठाभ्यां॰॥एवंहृदयादिन्यासः॥अथष.
न्यासः॥यःपादाभ्यां॰रुद्रःजंघाभ्यां॰ओंग्रोजानुभ्यां॰यऊरुभ्यां॰
अप्सुगुह्याय॰यःमेढ्राभ्यां॰ओषधीषुनाभौ॰यःउदरारुद्रःहृदयेभ्यो
विश्वाकंठाभुवनामुखेविवेशनासिकायांतस्मैनेत्रयोःरुद्रायभ्रू
मध्येनमःललाटेअस्तुशिरसितःसर्वेणमंत्रेणव्यापकन्यासंकृत्वा॥

ण

एतेरुद्रइतिमुद्राप्रदर्शयेत्॥अथमुद्रालक्षणं॥अंगु
ल्यग्राणिमुखेकृत्वागुष्ठेनपीडयेद्वासामुद्राभु
द्राभोक्तासर्वशांतिप्रदायिनी॥१॥उच्छ्रितंदक्षि
णांगुष्ठंवामांगुष्ठेनवेष्टयेत्॥नामांगुलीभिर्दक्षि
णामिरंगुलीभिश्चवेष्टयेत्॥शलिंगमुद्रयमारव्या
ताशिवसांनिध्यकारिणी॥इत्यंकृमंत्रेणमुद्राप्र
दर्शयेत्॥श्रीकामोमस्तकेचैवतेजस्कामस्तुनेत्रयोः॥
सुरक्षत्वंनाद्यकामस्तुज्ञानेनामोत्रदर्शयेत्॥पापक्ष

यमिचारेचव्याधाऽपगतेतथा॥ बहिश्शरीरात्कुर्वीतशिव
स्यात्मनिचस्मन्॥४॥एवंप्रदर्शयित्वातुतेताध्यानंसमा
रेत्॥अथध्यानं॥शरच्छशांकसंकाशंभद्रपीठा
सनास्थितं॥चतुर्भुजंत्रिनेत्रंचशुद्धस्फटिकसंनिभं॥अ
क्षतेनचरणौद्वौकलशौहस्तयोर्द्वयोः॥हस्तद्वयेनयो
गस्थंकृत्तमुद्राशिरासनं॥सर्वकामप्रदंशांतंशंकरंकरुणा
करं॥उग्रंकपर्दिनंचैवोग्रमूर्तिंध्यायेदुमापतिं॥द्विभुजंना
गहस्तंचशूलपाणिंजटाधरं॥ध्यात्वैनंशंकरंपापात्मुच्य
तेनात्रसंशयः॥इतिध्यानं॥अधःशायिकर्मकांडेब्रह्म

चारीहविष्यभुक्॥आयुतेहजपंकुर्यात्सत्यंहृजपेच्छिवं
॥नजुहुयात्तद्दशांशेनतद्दशांशेनतर्पणं॥मार्जनंतद्दशांशेनात
द्दशांशेनभोजयेत्॥एवंकृतेसुसिद्धिस्यात्कलाथऽयुतंजपेत्॥
पुरश्चरणमेवंहिकृत्वासंपूज्यशंकरं॥जपंतंतंतुरुद्रस्य स
र्वकामार्थसिद्धये॥जुहुयात्पंचमध्वक्तैःपायसंजुहुयात्ततः॥
विनायश्रीफलैर्बिल्वैरायुष्यार्थीतुदूर्वया॥तिलैराज्येनस
मिद्भिस्तेजस्कामोघृतेनवै॥श्रीकामःपद्मकाम्यैस्तुहुत्वैतं
शर्करान्वितं॥मधूक्तान्यकपत्राणितीव्रज्वरविनाशनं॥स
र्वरोगविनाशायसूर्यामिमुखंजपेत्॥एकमन्नंतुलक्षगुणं
द्विगुणंनक्तभोजनं॥त्रिगुणंतूपवासंस्यान्मासाद्वातत्फलंस्मृ

तं॥श्रीकामः शांतिकामोवाजपेद्दूक्षाजितेंद्रियः॥श्री
कामःश्रीसमिद्भिश्चशांतिकामःशमीमयैः॥गुडूचीवा
ज्यसंमिश्रैतर्पणंभोजनस्मृतं॥एवंसर्वेषुकार्येषुकोमातेजु
ह्वयाद्यवैः॥सर्वेषांविनाशार्थंश्रीसूर्याभिमुखोजपेत्
॥आयुर्वेदेनपेद्धोमःकुर्याकंसमिधःशुभैः॥औदुंबरैरन्न
कामस्तेजस्कामस्तुखादिरैः॥अपामार्गसमिद्धोमा
द्भूतबाधाविनश्यति॥महाबाधाविनाशायजपेद्वटस्य शिव
समिद्धे॥लवणान्वितमध्वक्तास्तिस्रोगुग्गुलसंभवाः॥
कुर्यात्समिधश्शुष्काःस्वाहांतंमंत्रमुच्चरन्॥एवंपंचाहुतिर्हुत्वा ४
गच्छगच्छेतिवेत्॥यावद्धोमबलिर्देयःपुरुषाहारसंमितः॥

एवंकृत्वाप्रमुच्येतपुमान्स्त्रीवामहायनात्॥यंजेतुमिच्छेत्पुरुषंतस्या
नाभिमुखोजपेत्॥जुहुयाद्धुतमंत्रेणसदृष्टोजयमा
नुयात्॥लाजाहोमेकन्यार्थेकन्याकामतुरूपिणी॥
लाजाश्चमधुसंयुक्ताःश्वेतपुष्पेश्चवापुनः॥हूयंते
हरितदेशेतस्याविघ्नंवशंभवेत्॥वामागमुक्तंकार्यस्त्रीशि
वेवीक्षणेः॥हस्यश्चामात्यशांतिवाहिकेस्वाज्यनस
युतैः॥होमस्थानेतुसंस्थाप्यकुंभमेकंजलान्वितं॥मंत्रयित्वा
ष्टसाहस्रंनवकुंभेविनिक्षिपेत्॥अभिषेकस्तुतेस्नपंशालां
प्रोक्ष्यत्रदक्षिणं॥ग्रहयागादिशांतिश्चसर्वकार्येष्वुदीरितः॥

वासुदेवाग्नुकर्तव्याप्राच्यांदिक्षुशुभप्रदा॥इशान्येनोबलिःका
र्यभूतानांपतयेपिवा॥एवंकृतेपशूनांवैवृद्धिर्गवांतिमा
नुयात्॥अनुक्तेषुचसर्वेषुनिशायांग्रामबाह्यतः॥उपवि
श्यजपेद्दंडीरक्तवस्त्रोमरुः॥होमःपलाशसमिधैःक
र्तव्योघृतसंयुतः॥इशानायबलिःकार्यःयस्यादिशतद
नुता॥तद्दिशापतयेचैवभूतानांपतयेतथा॥इष्टकामोजपे
द्दक्षतिलरोमाघृताप्लुतैः॥शिवंजातुकर्तव्याशिव ५
स्यकरुणस्यच॥सर्वमिनश्चिवार्थेवाशिवंजपोभवेत्॥आ
युतद्वयमल्पार्थेयावद्दक्षक्षतोभवेत्॥एवंकृतेतुसिद्धिःस्या

निष्कामस्तुशिवंध्यायेत्॥जपेच्चनियतोनित्यंत्रिकालंशंकरंप्र
ति॥अर्चयेत्तेवचाव्यग्रोयावन्नस्खलतेमनाःस्तुतः॥तर्पयेच्चाघि
धानेनदशांशंसुरवारिणा॥पुष्पाक्षतादियुक्तेनजलेसंपूज्य
पूर्ववत्॥ततोबिल्वफलैःपुष्पैःपत्रैरपिघृतान्वितैः॥पूर्वोक्तेनविधा
नेनदेवानाबाह्यपूजयेत्॥पूजान्तेकालिकांनित्यंजपेत्तर्पणमेवच
॥होमोब्राह्मणभुक्तेचपुरश्चरणमुत्तमं॥यदिहोमेशक्तिस्य ×च्य
पूजायांतर्पणेपिवा॥यावत्संख्याजपेनैवब्राह्मणाराधनेति
च॥भवेद्गव्येनैवपुरश्चरणमुत्तमं॥जपदशांशतोहोमतद्दशां
शेनतर्पणं॥तद्दशांशेनमार्जनंतदंशेनब्राह्मणभोजनं॥

इतिपु[illegible]णविधिः॥ ॥अथयंत्रविधिः॥सौवर्णेरजतेताम्रेपटेवा
जेयथाविधिः॥विनायंत्रेणचस्नात्वादेवतानघसोदति॥विधुंषट्कोणमे
स्तारंपुनर्वसुदलंलिखेत्॥षोडशारंमहादेवीचतुर्द्वारंचतुर्दिशं॥क
र्णिकामध्यदेशेचयोजयेद्धवमव्ययं॥षट्कोणेचषडंगानिपूर्वादि
क्रमतोन्यसेत्॥अनंतंचतथासूक्ष्मंशिवंचैवैकनेत्रकं॥एकरुद्र
त्रिमूर्तिंचश्रीकंठंचशिखंडिनं॥उमाचंडीश्वरोनंदीमहाकालोमहेश्व
रः॥वृषभृंगीरटिस्कंदश्चैतेषत्रैकतोलिखेत्॥असितांगोरुरुश्चंडः
क्रोधउन्मत्तभैरवः॥कपालभीषणश्चैवसंहारोष्टोचभैरवाः॥षोड
शारेदलेलेख्याब्रह्माद्याश्चाष्टमातरः॥ब्राह्मीमाहेश्वरीचैवकौमा

रीवैष्णवीतथा॥वाराहीचतथेंद्राणीचामुंडाचंडिकातथा॥बामाज्ये
ष्ठाचश्रेष्ठाचरौद्रीकालीकलीतथा॥कलविकारिणीचैवबलप्रमाथि
नीतथा॥इंद्राग्नियमश्चैवनिर्ऋतिंवरुणंतथा॥वायुंकुबेरमीशानं
लोकपालाष्टकंयजेत्॥पूर्वेशानयोर्मध्येलोकाधिपतयेसायुधाय
सवाहनायसशक्तिकायनमः॥पश्चिमनैर्ऋत्योर्मध्ये॥ॐ
ह्रींअनंतायसर्वनागाधिपतयेसायुधायसशक्तिकायनमः॥
नद्दाले॥सर्वपार्श्वेभ्योनमः॥ॐनमोभगवतेशक्तियुक्तायाना
नंताय[illegible]गपीठात्मनेनमइतिमंत्रेणपीठमध्येपुष्पांजलिं
दद्यात्॥मूर्तेरभ्युत्थानादिकृत्वा॥आवाहनादिषोडशोपचा
रैःसंपूज्य॥ततः स्तुतिः॥ॐनमःशिवायदेवायस्वतंत्रायाखिल

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

लात्मने॥ प्रधानपुरुषार्थायजगद्सर्गादिहेतवे॥योबिभर्तिसदासाक्षी
स्वरूपेणस्वभावतः॥तंनमाम्यादरेणैवशिवमानंददायकं॥अ
मूर्त्यात्मनाविश्वमधिष्ठायास्थितंशिवं॥भजस्वसर्वभावनशिवं
परमकारणं॥यथाशिवस्तथादेवीयथादेवीतथाशिवः॥नान
योरंतरंविद्याच्चंद्रचंद्रिकयोरिव॥इतिस्तुतिः॥यस्यस्मृत्यति
विसर्जनं॥इतिरुद्रयामलेमदनंमहार्णवेऊनत्रिंशदधिक
शततमंसमाप्तं॥ ॥श्रीशके १८०० पराभवसंवत्सरे॥आश्विनशुद्ध २
रवाविदंपुस्तकंसमाप्तं॥ ॥महादेवोजयति